# शास्त्री-प्रथमवर्षम्

## प्रथमपत्रम् व्याकरणम्

## पाठ्यक्रमनिष्पत्तयः

षट्सु सत्रार्द्धेषु विभक्तः अयं पाठ्यक्रमः अस्ति। तत्र शास्त्रिप्रथमवर्षस्य प्रथमसत्रार्द्धे प्रथमपत्ररूपेण लघुसिद्धान्तकौमुदी, तर्कभाषा च द्वे पुस्तके अनिवार्यपत्रत्वेन वर्तेते। तत्र लघुसिद्धान्तकौमुदीग्रन्थः आधुनिक धारागतच्छात्राणां कृते निर्धारितः वर्तते। तर्कभाषाग्रन्थश्च परम्पराधारागतच्छात्राणां कृते निर्धारितः वर्तते। तत्र लघुसिद्धान्तकौमुदीग्रन्थस्य (प्रथमद्वितीयसत्रार्द्धयोः) अध्ययनेन निम्नलिखितानि प्रयोजनानि सिध्यन्ति। (लघुसिद्धान्तकौमुदी) पञ्चसन्धिप्रकरणं यावत्)

- पाणिनीयव्याकरणे प्रवेशः।
- माहेश्वरसूत्राणां ज्ञानं प्रत्याहार निर्माणावगमः।
- पाणिनीयव्याकरणसम्बन्धिपारिभाषिकशब्दानां (संज्ञासूत्राणाम्) बोधः।
- वर्णानां शुद्धोच्चारणविज्ञानम्, उच्चारणस्थानप्रयत्नयोः विवेकः।
- सन्धिस्वरूपज्ञानम्।
- अच्सन्धिज्ञानम्, तत्प्रयोगश्च।
- हल्सन्धिज्ञानम्, तत्प्रयोगश्च।
- विसर्गसन्धिज्ञानम्, तत्प्रयोगश्च।
- संस्कृतभाषायां सन्धियुक्तपदानां ज्ञानपूर्वकः प्रयोगः।
- स्त्रीप्रत्ययान्तशब्दान् विज्ञाय संस्कृतभाषायां तेषां प्रयोगः।
- समासशब्दान् विज्ञाय संस्कृतभाषायां तेषां प्रयोगः।